उपशास्त्री ॥ 03-10-2020

संस्कृतसामान्यम् ।

अनिवार्यप्रथमपत्रम्

धातुरूपाणि ।

√कथ् – ( कहना , चुरादिगणीय )

| लकार | पु० | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| लट् | प्र० पु० - | कथयति | कथयतः | कथयन्ति |
| | म० पु० - | कथयसि | कथयथः | कथयथ |
| | उ० पु० - | कथयामि | कथयावः | कथयामः |
| लोट् | प्र० पु० - | कथयतु | कथयताम् | कथयन्तु |
| | म० पु० - | कथय | कथयतम् | कथयत |
| | उ० पु० - | कथयानि | कथयाव | कथयाम |
| विधिलिंग | प्र० पु० - | कथयेत् | कथयेताम् | कथयेयुः |
| | म० पु० - | कथयेः | कथयेतम् | कथयेत |
| | उ० पु० - | कथयेयम् | कथयेव | कथयेम |
| लङ् | प्र० पु० - | अकथयत् | अकथयताम् | अकथयन् |
| | म० पु० - | अकथयः | अकथयतम् | अकथयत |
| | उ० पु० - | अकथयम् | अकथयाव | अकथयाम |
| लृट् | प्र० पु० - | कथयिष्यति | कथयिष्यतः | कथयिष्यन्ति |
| | म० पु० - | कथयिष्यसि | कथयिष्यथः | कथयिष्यथ |
| | उ० पु० - | कथयिष्यामि | कथयिष्यावः | कथयिष्यामः |

(हस्ताक्षर) 03-10-2020

डॉ० निर्मल कुमार झा ( सं० प्रा० )
रा० उ० सं० महावि० सुखसेना , पूर्णियाँ

03-10-2020

संस्कृतसामान्यम् । उपशास्त्री I

अनिवार्यप्रथमपत्रम् ।

प्रश्नः- हिन्दीभाषायाम् अनुवादं कुरुत ।

वर्षाकालः सुखकरः भवति । अस्मिन् काले विशेषतया कृषकाः प्रसन्नाः भवन्ति । ते कृषिकार्यं कुर्वन्ति । ग्रीष्मकालस्य आतपस्य शान्तिः भवति । सरः जलपूर्णः भवति । पन्थाः कर्दमपूर्णाः नवहरितैः तृणैः पृथ्वी आच्छन्ना च भवति । मण्डूकाः जलाशयेषु गीतं गायन्ति । नभसि इन्द्रधनुः अतीव रमणीयं दृश्यते । नद्यः जलपूर्णाः प्रवाहपूर्णाश्च भवन्ति । आकाशः मेघाच्छन्नः भवति । भारतवर्षे 'मानसूनी' इति जलवायुः वर्तते । अत्र जूनमासस्य प्रथमसप्ताहे प्रायशः वर्षाकालः प्रारभ्य सितम्बरमासावधिपर्यन्तं भवति । वर्षाकालः जीवनाधायकः भवति । क्षुद्रजीवाः यथा मशकादयः प्रजननकार्यं कुर्वन्ति । ते मानवेभ्यः अहितकराः कष्टदायकाः सन्ति । वर्षान्ते यदा शरदृतुः प्रारभ्यते तदा अक्टूबरमासे दुर्गापूजनोत्सवं जनाः आमनन्ति ।

अगले दिन इसका अनुवाद दिया जाएगा। तबतक छात्र स्वयं प्रयास कर दूरभाष पर मुझे सुनाएँ ।

(signature) 03-10-2020

डॉ० निर्मल कुमार झा (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

साहित्यम् । शास्त्री

अलङ्कारस्तथाच छन्द-लक्षणोदाहरणे पुनर्विचारः ।

स्रग्धरा → " म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धराकीर्त्तितेयम् "

२१ (इक्कीस) अक्षरों का यह छन्द है यानि इसके प्रत्येक पाद में इक्कीस अक्षर होते हैं। प्रत्येक सातवें अक्षर पर यति होती है। वर्णों का क्रम इस प्रकार है →

| मगण | रगण | भगण | नगण | यगण | यगण | यगण |
|---|---|---|---|---|---|---|
| S S S | S I S | S I I | I I I | I S S | I S S | I S S |
| या सृ ष्टिः स्र | ष्टुरा द्या, | व ह ति | वि धि हु | तं, या ह | वि र्या च | हो त्री, |

यह श्लोक महाकवि कालिदासरचित 'अभिज्ञानशाकुन्तलम्' नाटक के प्रथमाङ्क का मङ्गलाचरण है। सम्पूर्ण श्लोक इस प्रकार है →

या सृष्टिः स्रष्टुराद्या, वहति विधिहुतं, या हविर्या च होत्री,
ये द्वे कालं विधत्तः, श्रुतिविषयगुणा, या स्थिता व्याप्य विश्वम् ।
यामाहुः सर्वबीजप्रकृतिरिति यया, प्राणिनः प्राणवन्तः,
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥

अलङ्कार → पुनरुक्तवदाभासः ।

यहाँ प्राणिनः तथा प्राणवन्तः दोनों एक-दूसरे के पर्याय होते हुए भी भिन्नार्थक हैं।

लक्षण → आपाततो यदर्थस्य पौनरुक्त्यवभासनम्,
पुनरुक्तवदाभासः स भिन्नाकारशब्दगः। ← साहित्यदर्पणे ।

03-10-2020

डॉ० निर्मल कुमार झा (स० प्राचार्य)।
रा०उ० सं० महावि० सुखसेना, पूर्णियाँ ।